# ॥ कामाख्या कवचम् ॥

कामख्या ध्यानम्
रविशशियुतकर्णा कुकंउमापीतवर्णा,
मणिकनकविचित्रा लोलजिन्ह्वा त्रिनेत्रा ।
अभयवरदहस्ता साक्षसूत्रप्रहस्ता,
प्रणतसुरनरेशा सिद्धकामेश्वरी सा ॥
अरूण-कमलसंस्था रक्तपद्मासनस्था,
नवतरूणशरीरा मुक्तकेशी सुहारा ।
शवहृदिपृथुतूङ्गा स्वाङ्घ्रियुग्मा मनोज्ञा,
शिशुरविसमवस्त्रा सर्वकामेश्वरी सा ॥
विपुलविभवदात्री स्मेरवस्त्रा सुकेशी,
दलितकरकदन्ता सामिचंद्रावनन्मा ।
मनसिज-दृशदिस्था योनिमुद्रालसन्ती,
पवनगगनसक्त संश्रुतस्थानभाग ॥
चिंत्था चैवं दीप्यदग्निप्रकाशा,
धर्मार्थाद्यैः साधकेर्वाञ्छितार्थः ॥
कामाख्या-कवचम्
ॐ कामाख्याकवचस्य मुनिवृहस्पति स्मृतः ।
देवी कामेश्वरि तस्त अनुष्टुप्छन्द इष्यते ॥
देवनियोगः सर्वसिद्धो तञ्च श्रृणवन्तु देवताः ।
शिराः कामेश्वरि देवी कामाख्या चक्षूषी मम ॥
शारदा कर्णयुगल त्रिपुरा वदनं तथा ।
कण्ठे पातु माहामाया हृदि कामेश्वरि पुनः ॥
कामाख्या जठरे पातु शारदा पातु नाभितः ।
त्रिपुरा पार्श्वयोः पातु महामाया तु मेहने ॥
गुदे कामेश्वरि पातु कामाख्योरूद्वय तु माम् ।
जानुनोः शारदा पातु त्रिपुरा पातु जंङ्घयोः ॥
माहामाया पादयुगे नित्यं रक्षतु कामदा ।
केशे कोटेश्वरि पातु नासायां दीर्घिका ॥
भैरवी दन्तसंघाते मातंग्यावतु चांगयोः ।
ब्राह्मोर्म्मा ललिता पातु पाण्योस्तु वनवासिनी ॥
विंध्यवासिन्यङ्गलीषु श्रीकामा नखकोटिषु ।
रोमकूपेषु सर्व्वेषुः गुप्तकामा सदावतु ॥

पादांगलि पार्ष्णिमागे पातु माँ भुवनेश्वरी ।
जिह्वायां पातु मां सेतुः कः कण्टाभ्यन्तरेऽवतु ॥
पातु नश्चान्तरे वक्षः ई पातु जठरान्तरे ।
सामिन्दु पातु में वस्तो विन्दुविवद्धन्तरेऽवतु ॥
ककारस्तवचि माँ पातु रकोरोऽस्थिषु सर्व्वदा ।
लकारः सर्व्वनागिंषु ईकारः सर्व्वसन्धिपु ॥
चंद्रः स्नायुपु माँ पातु विन्दुर्मज्जासु सन्ततम् ।
पूर्वस्यां दिशि चाग्नेष्यां दक्षिणे नैऋते तथा ॥
वारूणे चैव वायव्यां कोवरे हर मन्दिरे ।
अकाराद्यास्तु वैष्णव्याल अष्टो वर्णास्तु मन्त्रगाः ॥
पान्तु तिष्ठन्तु सततं समुद्भयविवृद्धये ।
ऊर्द्धवांधः पातु सततं मान्तु सेतुद्वय सदा ॥
नवाक्षराणि मन्त्रेषु शारदा मन्त्रगोचरे ।
नवस्वरन्तु माँ नित्यं नासादिषु समन्तत ॥
वातपित्तकफेभ्यस्तु त्रिपुरायास्सु त्र्यक्षरम् ।
नित्यं रक्षतु भूतेभ्यः पिशाचेभ्यस्तथैव च ॥
तत् सेतु सतत् पाता क्रव्याद्भयो मान्निवारकौ ।
नमः कामेश्वरी देवीं महामायाल जगन्नमयीम् ॥
या भूत्वा प्रकृतिर्नित्य तनोति जगदायतम् ।
कामाख्यामक्षमालाभयवरदकरां सिद्धसूत्रैकहस्तां ॥
श्वेतप्रेतोपरिस्थां मणिकनकयुतां कुङ्कमापीतवर्णाम् ।
ज्ञानध्यानप्रतिष्ठामतिशयविनयां ब्रह्मशक्रादिवन्द्या-
मग्नौ विन्द्धन्तमन्त्रप्रियतमविषयां नौमि सिद्धयैरतिस्थाम् ॥
मध्ये मध्यस्यभागे सततविंन मता भावहारावली या,
लीलालोकस्य कोष्ठे सकलगुणयुता व्यक्तरूपैकनम्रा ।
विद्या विद्येकशान्ता शमनशमकरी क्षेमकत्री वरास्या,
नित्यं पायात् पवित्रप्रणववरकरा कामपूर्व्वेश्वरी नः ॥
इति हरकवच तनुस्थितं शमयति वै शमनं तथा यदि ।
इह गृहाण यतस्व विमोक्षणे सहितएषः विधि सह चामरैः ॥
इतिदं कवचं यस्तु कामाख्याः पठेद् वुधः ।
सकृत तं तु महादेवी तनुब्रजति नित्यदा ॥
नाधिव्याधिभयं तस्य न क्रव्याद्भौ भयं तथा ।
नाग्नितो नापि तोयेभ्यो न रिपुभ्यो न राजतः ॥
दीर्घायुर्व्वह्वभोगी च पुत्रपौत्रसमन्वितः ।
आवर्त्तयन् शतं देवी मन्दिरै मोदते परे ॥
यथा तथा भवेद्बद्धः संग्रामेऽन्यत्र वा बुद्धः ।

तत्क्षणादेव मुक्तः स्यात् स्मारणात् कवचस्य तु ॥

Visit http://www.webdunia.com for additional texts with Hindi meanings.

---

Please send corrections to sanskrit@cheerful.com
Last updated November 22, 2001